[MW, Apte]

**अञ्चितपत्त्राक्ष** (añcitapattrākṣa) *adj.* having lotus eyes [MW]

**अञ्चितपद** (añcita-pada) *adj.* having beautiful feet विंशत्या नखसङ्ख्ययाञ्चितपदः…करी MātaLī. 2. 3.

**अञ्चितपद्माक्ष** (añcita-padmākṣa) *adj.* having beautiful lotus-like eyes अन्यदञ्चितपक्ष्मान्तम् (v. l. °पद्माक्षम्) दक्षिणं निःसृतं मुखम् MahāBhā. i. 203. 23; तचार्वञ्चितपद्माक्षम् … । अपश्यतो मुखं तस्याः सीदतीव मनो मम Rāmā. iv. App. I. 2 (10)

**अञ्चितपयोधरभारा** (añcita-payodharabhārā) *adj.* possessing heavy udders which are beautiful गौरवाञ्चितपयोधरभारा गौतमी हरति लोचनजाड्यम् YātrāPra. 7. 13.

**अञ्चितपाद** (añcita-pāda) *m.* foot in the posture called *añcita* (heel on the ground, the front part raised) अञ्चितपादः सन्नपसृतो द्वितीयपादनिकटात् पलायितकोऽयं (?तो यः तत्) समकालमेव तत्पार्श्वगं शिरः Abhin-Bhā. i. 129. 10 (*on* 4. 141)

**अञ्चितपिञ्छाचूड** (añcitapiñchā-cūḍa) *adj.* having a beautiful peacock feather on the crest अञ्चितपिञ्छाचूडम् … बालं गोपालमनिशमवलम्बे KṛṣṇaKa. 2. 78.

**अञ्चितपुटता** (añcitapuṭa-tā) *f.* the state of having bent or contracted eye-lids प्रम्लानाञ्चितपुटतामरालकेश्याः…। अन्यस्याः…श्रान्ताया दयिततमं जहार दृष्टिः HarVi. 17. 101 (but comm. अञ्चितौ प्रसृतौ पुटौ)

**अञ्चितपूर्वकाय** (añcita-pūrvakāya) *adj.* who has bent (backwards) the forepart of his body (while shooting) आरादपश्यत् … । आकुञ्चितैकपदमञ्चितपूर्वकायं लक्ष्यीकृतात्मवपुषं मदनं महेशः PārvPa. 3. 10.

**अञ्चितफालदेश** (añcita-phāladeśa) *adj.* with a forehead rendered beautiful स्वेदोद्गमैरञ्चितफालदेशम् …। धूमाभिषङ्गेण मुखं मृगाक्ष्या रक्तारविन्दद्युतिमन्वयासीत् Nalābhyu. 5. 56.

**अञ्चितभव्यभागा** (añcita-bhavyabhāgā) *adj.* (*f.*) of which the noble regions are honoured (द्वारकाम्) अर्चिर्मुखैरञ्चितभव्यभागाम् । निवृत्तिधर्मे नियतस्थितीनां नैःश्रेयसीं पद्धतिमाहुरेनाम् Yādavā. 18. 119.

**अञ्चितभूपालचक्र** (añcita-bhūpālacakra) *adj.* who has made a host of kings bow down अभूच्च तनयस्तस्य…। गुणैरञ्चितभूपालचक्रः PārśvC. 3. 1073.

**अञ्चितभ्रम** (añcita-bhrama) *adj.* moving all around अम्बु पीतम् …। प्रावृषा पवनचक्रयोजिता वारिदा ववमुरञ्चितभ्रमाः Acyutarā. 4. 7 (comm. अञ्चितः कृतः भ्रमः भ्रमणं इतस्ततः संचारश्च)

**अञ्चितभ्रु** (añcita-bhru) *adj.* characterised by arched eyebrows आविर्मयूखसितमञ्चितभ्रु । लब्ध्वा प्रिये दुर्लभमाननं ते MattaVi. 2; गीतं स्फुरत्पञ्चममञ्चितभ्रु विलोकितं नूपुरनिस्वनश्च । नृपाङ्गनायास्त्रयमेतदासीत् त्रैलोक्यराज्ये मदनस्य शस्त्रम् VikraDeC. 10. 33.

**अञ्चितभ्रू** (añcita-bhrū) *adj.* (*f.*) (a lady) having beautiful arched eye-brows बिभ्रत्यराजदसितागुरुपङ्कदिग्धपत्त्रावलीविरचनाशबलं कपोलम् । … अञ्चितभ्रूः HarVi. 23. 22; जनी सुनेत्रा प्रमदा च सुन्दरी स्यादञ्चितभ्रूर्ललिता विलासिनी RājNi. 262. 2.

**अञ्चितभ्रूकम्** (añchitabhrū-kam) *adv.* with raised eyebrows वक्ष्यामि सापराधं क्रोधस्फुरदधरमञ्चितभ्रूकम् । इति विदधाति सुमध्या हृदयेन मनोरथावृत्तिम् KuṭṭaMa. 1019.

**अञ्चितभ्रूलत** (añcita-bhrūlata) *adj.* [*f.* -ā] in which the creeper-like eye-brows are curved or raised स्खलितवलयशब्दैरञ्चितभ्रूलतानाम्…सुचिरमनभिमृष्टान्धारयत्येष केशान् PādaTā. 48. 5; तन्नयनाभिमुखैः किंचिदाकुञ्चितैरेधितभ्रूलतैः (v. l. Kale's Ed. अंचितभ्रूलतै )रपाङ्गवीक्षितैः … राजवाहनं विलोकयन्त्यतिष्ठत् DaśKuC. 28. 18; संक्षिप्यत्यरुणं गृहीतवसने किंचाञ्चितभ्रूलतम् । मानिन्याः … चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि KāvyPra. 97. 2.

**अञ्चितम्** (añcitam) *adv.* **i** unperturbedly, calmly अञ्चितं गच्छति । प्रकाशयत्यात्मानमिति गम्यते । न वै लोकेऽञ्चितं गच्छतीति प्रकाशनं गम्यते । किं तर्हि समाधानं गम्यते । समाहितो भूत्वा गच्छतीति MahāBh. iii. 408. 16 (*on* viii. 2. 48); अव्याकुलं गच्छतीत्यर्थके 'अञ्चितं गच्छति' इत्यादौ नलोपो न LaS'abdeS'e. i. 343. 11; **ii** gracefully, beautifully अञ्चितोत्थितपृथुनितम्बबिम्बलम्बिचलदंशुकाञ्चलम् (पर्यक्रीडत राजकन्या) DaśKuC. 104. 21.

**अञ्चितमरुद्बल** (añcitamarud-bala) *n.* force of the wind blowing across (दोला) किं चेयमञ्चितमरुद्बलतो वलन्ती … पश्य प्रिये नभसि लास्यमिव प्रयुङ्क्ते S'rīKaC. 7. 59 (*but* comm. अञ्चितो मृदुत्वेन पूजितो यो मरुत्तद्बलेन)

**अञ्चितमाल्य** (añcita-mālya) *n.* beautiful offering consisting of flowers हेमनिभाम् … अञ्चितमाल्यैरधिगतवपुषं कान्तिमतीं वसुधाराम् ĪśānS'iPa. i. 26. 20.

**अञ्चितलड्डुकव्रज** (añcitaladduka-vraja) *m.* multitute of sweet-balls decorated or smeared (with powdered sugar) सितयाञ्चितलड्डुकव्रजान् … । परमान्नमिदं च पार्वति प्रणयेन प्रतिपादयामि ते TripuMāPūSt.(S'aṅ.) 108.

[1]**अञ्चितलाङ्गलिक** (añcita-lāṅgalika) *adj.* adorned with or beautified by the herb called *lāṅgalikā* (*Methonia superba* or *Jussicea repens*) सहरिगोपकमैक्षत भूतलं व्रजमिवाञ्चितलाङ्गलिकं जनः HarVi. 3. 51 (*but* comm. अञ्चिता श्रेष्ठा लाङ्गलिका ओषधिविशेषो यत्र)

[2]**अञ्चितलाङ्गलिक** (añcitalāṅgali-ka) *adj.* adorned (i. e. inhabited) by Balarāma, HarVi. 3 51 (comm. अञ्चितश्च पूजितो लाङ्गली हलधरो यत्र)

**अञ्चितलाङ्गूल** (añcita-lāṅgūla) *adj.* having a curved tail, who has curved his tail (upwards) ततः श्रुत्वा कपीनां तं निनदं कपिसत्तमः । आयताञ्चितलाङ्गूलः सोऽभवद् धृष्टमानसः Rāmā. v. 62. 35; vi. 18. 38; उच्चैरञ्चितलाङ्गूलः शिरोऽञ्चिन्वेव संवहन् (कपिकेशरी वनं चचार) Bhaṭṭi. 9. 40.

**अञ्चितलोचन** (añcita-locana) *adj.* [*f.* -ā] **1A** (a look) in which the eyes are turned or cast downwards श्रमात्प्रम्लोपितपुटा क्षामान्ताञ्चितलोचना । सन्ना पतिततारा च श्रान्ता दृष्टिः प्रकीर्तिता NāṭyaS'ā. 8. 65; 8. 82; **1B** having eyes contracted (out of haughtiness) कामदेववत्कर्तव्यो रूपेणाप्रतिमो भुवि । … चापबाणकरश्चैव मदादञ्चितलोचनः ViṣṇuDhaP. iii. 73. 20; **2** [= अञ्जित] having eyes smeared with collyrium कदम्बवनमध्ये तु यायादञ्चितलोचनः JayāS. 32. 40; नक्रवश(?स)याञ्चितलोचनस्य स्थलं ते सकलमम्बुधिजलम् TilaMañ. 146. 11; **3** possessing beautiful eyes इत्युक्त्वा रघुनाथस्य भार्यामञ्चितलोचनाम् । तूष्णीं बभूव हृष्टा सा समुद्गततनूरुहा PadmP. iv. 4. 44; सहेलकृतकण्ठहठग्रहं च । निर्भुज्य कञ्चुकमथाञ्चितलोचनाभिस्तल्कमैणः पदमकल्प्यत कान्तलोकः S'rīKaC. 15. 11.

**अञ्चितलोचनद्वयपुट** (añcita-locanadvayapuṭa) *adj.* with the lids of both eyes cast down (i. e. lowered in obedience) गच्छेन्नुन्नतया भ्रुवैव गदितं मन्दं वलन्त्या तया । तेनाप्यञ्चितलोचनद्वयपुटेनाज्ञा गृहीता शनैः AmaS'. 144 = Subhāṣi. 2079.

**अञ्चितवत्** (añcita-va(n)t) *adj.* **1** one who has honoured (the preceptor etc.) नकारे सत्यञ्चतेः परस्य क्त्वः क्तक्तवतोश्च इड् भवति । … अञ्चितवान् CāndraVṛ. *on* v. 4. 113; अञ्चतेः पूजायामर्थे त क्त्वा इत्येतयोरिड् भवति । … अञ्चितः । अञ्चितवान् । अञ्चित्वा गुरून् गतः JaineVyā. 348. 20 (*on* v. 1. 101); **2** which has adorned or beautified (the various quarters) दिशो ध्वजैरञ्चितवद्गमौकोऽञ्चित्वा … अप्सरोगणोऽश्वो पवितः प्रपेदे DvyāśraKā. 10. 34; **3** who has reached or attained (death etc.) श्रीकर्णः … निद्रामुद्रितलोचनः कण्ठपीठप्रणयिना सुवर्णशृङ्खलेन प्रविष्टन्यग्रोधपादपेनालम्बितः पञ्चतामञ्चितवान् PrabaCin. 92. 29 = KumāDePra. 112 + 18. 7; KumāPraPra. 106. 29.

**अञ्चितवपुःपश्चार्ध** (añcita-vapuḥpaścārdha) *m.* hind part of the body which is bent (upwards, i. e. raised) पश्योदञ्चदवाञ्चदञ्चितवपुःपश्चार्धपूर्वार्धभाक् … उत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी VāsaDa. 103. 1; SubhāRaK. 49. 18 = SaduktiKa. 280. 11.

**अञ्चितवामचरण** (añcita-vāmacaraṇa) *adj.* bending the left foot केचिदञ्चितवामचरणा दक्षिणखुलुखित (v. l. दक्षिणखुरलिखित) भूतलाः … शारभं नाम (सप्तयः समादर्शयन्) AvantiKa. 66. 18.

**अञ्चितविक्रम** (añcita-vikrama) *adj.* of esteemed or adorable prowess अथ समाववृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपम् । … मधुरञ्चितविक्रमम् RaghuVa. 9. 24.

**अञ्चितविधुतशिरस्क** (añcitavidhutaśiras-ka) *adj.* (posture of a horse) in which the head is tilted and shaken केचिदञ्चितविधुतशिरस्कं दर्शितनाभि … त्रेतालं नाम (सप्तयः समादर्शयन्) AvantiKa. 66. 22.

**अञ्चितविबुध** (añcita-vibudha) *m.* honoured wise man तत्र च संततौ … अञ्चितविबुधाभिवाञ्छितप्रतिपादनमन्दारैः … महात्मभिरलंकृतायाम् … गर्भधारक इति कृताभिधानः … सुधीराविरासीद् ĀnandRa. 2. 0(2)

**अञ्चितविलोचना** (añcita-vilocanā) *adj.* (*f.*) with cast-down eyes मणिकाञ्चिरञ्चितविलोचनया रभसादबध्यत ततोऽपरया S'rīKaC. 13. 24 (*but* comm. अञ्चिते सुरतावसरे लज्जाविषयत्वाभावादानन्देन विस्तीर्णे लोचने यस्यास्तया मणिकाञ्चिरबध्यत बद्धा)

**अञ्चितविष्टर** (añcita-viṣṭara) *m.* seat which is sanctified (*lit.* worshipped) (दर्भान्) मूलेन प्रयजेज्जलादिभिरुपान्त्येनैनमुत्तानयेदुन्नीयाञ्चितविष्टरे स्वमनुनिष्ठेनान्तिमेन न्यसेत् TantrSa. 8. 21.

**अञ्चितवीर्यरूप** (añcita-vīryarūpa) *adj.* possessing valour and form which are honourable or dignified इन्द्राच्छचीवाञ्चितवीर्यरूपं जयन्तमीशाद्गुहमम्बिकेव । तस्मात्तनूजं लभते स्म राज्ञी VīraBhā. 1. 71.

**अञ्चितवृत्त** (añcita-vṛtta) *adj.* of esteemed or honourable conduct